**प्रो. पी.एन्. शास्त्री**
कुलपति
**राष्ट्रिय संस्कृत संस्थान**
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
**('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)**

**Prof. P.N. Shastry**
Vice-Chancellor
**RASHTRIYA SANSKRIT SANSTHAN**
Deemed to be University
(Under MHRD, Govt. of India)
**(Accredited by NAAC with 'A' Grade)**

## सतर्कताजागरूकतासप्ताहसन्देशः

केन्द्रीयसतर्कतायोगेन सार्वजनीनजीवने निर्व्याजतानयनाय भ्रष्टाचारमुक्तसमाजस्य निर्माणाय च प्रयासः विधीयते । तदङ्गतया प्रतिवर्षं सतर्कताजागरूकतासप्ताहः अनुपाल्यते । सतर्कताजागरूकतासप्ताहस्य अनुपालनं सार्वजनीनजीवने निर्व्याजतायाः पारदर्शतायाः अस्मद्दायित्वस्य च उद्देश्यं दर्शयति । अतः आयोगः भ्रष्टाचारं निरुद्ध्य संघर्षयितुं जनतासु जागर्यामुत्पादयितुं च प्रयतते।

"**निर्व्याजतायाःप्रोत्साहनम्,भ्रष्टाचारोन्मूलनं च**" इति सतर्कताजागरूकतासप्ताहस्य कृते विषयः आयोगेन चितो वर्तते। समाजस्य निम्नस्तरं प्रति आर्थिकविकासं प्रापयितुं भ्रष्टाचारं न सहेमहि । यद्यपि विभिन्नाः भ्रष्टाचारनिरोधसंस्थाः भ्रष्टाचारसमस्यायाः निवारणाय प्रयतन्ते तथापि तत्सम्बद्धनां सहयोगं विना स च प्रयासः सफलः न भवति । अतः इदमत्यावश्यकं यत् भ्रष्टाचारनिरोधाभियोगे जागरूकता तथा जनतायाः सहकारः च ।
जागरूकतायाः उत्पादनेन सह भ्रष्टाचारनिरोधप्रयासेषु जनतायाः सहभागेनैव समाजे भ्रष्टाचारोन्मूलनसंकल्पनायां दार्ढ्यमायातीति आयोगः मनुते । आयोगः संबन्धितविषये जनानां अधिकसहयोगाय समाजस्य सर्वेषु वर्गेषु जागर्यामुत्पादयितुं च प्रेरयति । आयोगस्य इमं संदेशं संदधाना वयम् अस्माकं कार्यक्षेत्रे निस्स्पृहतया कार्यम् आचरामः तदैव शान्तिः लभ्यते, यथा उपदिदेश भगवान् श्रीकृष्णः -

**विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः।**
**निर्ममो निरहङ्कारः स शान्तिमधिगच्छिति।।(भ.गी.02.71)**

राष्ट्रियसंस्कृतसंस्थानपरिवारसदस्या वयमपि निर्लोभं कार्यं विदध्महे तदपि भ्रष्टाचारोन्मूलने भ्रष्टाचारमुक्तसमाजस्य निर्माणे च अस्माकं योगदानं स्यात् ।

प ना शास्त्री

**(आचार्यः परमेश्वरनारायणशास्त्री)**
**कुलपतिः**

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995 E.Mail : rskspvc@yahoo.com